ब्रह्माकारगरूपेण वटस्य कणिकात्मना ।
क्रमते क्रमतो जीवो जाग्रदादीन् स पश्यति ॥
समाध्यारम्भकाले तु पूर्व्वमेवावधारयेत् ।
मुमुक्षुः पश्चात् संजाते अन्तःकरणनिश्चले ॥
विलापयेत् क्षेत्रजातं क्षेत्रज्ञं परिशेषयेत् ।
पञ्चीकृतेभ्यो भूतेभ्यः अण्डादिव्यतिरिक्तकम् ॥
यथा मृदो घटो भिन्नो नास्ति तत्कार्य्यतस्तथा ।
पञ्चीकृतानि भूतानि अपञ्चीकृतभूततः ॥
समष्टिव्यतिरेकेण शिवं सूक्ष्मशरीरकम् ।
अपञ्चीकृतभूतेभ्यो न लिङ्गं व्यतिरिक्तकम् ॥
पृथ्वी वारि विना नास्ति वारि नास्ति च तेजसा ।
तेजश्च वायुना नास्ति वायुः खेन विना न हि ॥
सद्ब्रह्मणा च खं नास्ति शुद्धब्रह्म विना च सत् ।
शुद्धभावात्तथा जाग्रत्स्वप्नादीनामसम्भवे ॥
जीवत्ववर्ज्जितः प्रत्यगात्मा वै तनुरूपकः ।
नित्यशुद्धबुद्धमुक्तं सत्यं ब्रह्माद्वितीयकम् ॥
तत्त्वंपदार्थौ शिवौ तत्राकारो ब्रह्मकारकः ।
उकारश्च अकारश्च मकारोऽहं इगद्वयः ॥
ब्रह्माहमस्म्यहं ब्रह्म ज्ञानमज्ञानमर्द्दनम् ।
अयमात्मा ब्रह्मज्योतिर्विज्ञानानन्दरूपकम् ॥
सत्यज्ञानमनन्तः स तत्त्वमसि श्रुतीरितम् ।
अहं ब्रह्मास्मि ब्रह्माहं सर्व्वप्राणिषु सर्व्वगम् ॥
योऽसावादित्यपुरुषः सोऽसावहमनादिमत् ।
गीतासारोऽर्ज्जुनायोक्तो येन ब्रह्मणि वै लयः ॥”

इत्यादिमहापुराणे गारुडे गीतासारे २३६ अध्यायः ॥

गीतिः, स्त्री, (गै गाने + क्तिन् ।) गानम् । (यथा, कुमारे । ३ । ४० ।
“श्रुताप्सरोगीतिरपि क्षणेऽस्मिन्
हरः प्रसंख्यानपरो बभूव ॥”)
आर्य्याच्छन्दोविशेषः । इति मेदिनी । ते १६ ॥ (अस्या लक्षणं यथा छन्दोमञ्जर्य्यां मात्रावृत्ते । ७ ।
“आर्य्याप्रथमार्द्धसमं यस्याः परार्द्धमीरिता [गीतिः ॥”)

गीरथः, पुं, (गीर्व्वाणी वाङ्मयं शास्त्रमित्यर्थः रथ इव यस्य ।) वृहस्पतिः । इति त्रिकाण्डशेषः ॥

गीर्णः, त्रि, (गीर्य्यते स्म इति । गॄ गि स्तुतौ + क्त ।) स्तुतः । इत्यमरटीकायां भरतः ॥

गीर्णिः, स्त्री, (गॄ + क्तिन् । ऋल्वादिभ्यः क्तिन्निष्ठावत् तेन नत्वम् ततो रेफात् णत्वञ्च ।) गिलनम् । इत्यमरः । ३ । ३११ ॥ स्तुतिश्च । गीर्णशब्ददर्शनात् ॥

गीर्देवी, स्त्री, (गीर्व्वाणी तस्या देवी । वागधिष्ठातृतयास्यास्तथात्वम् ।) सरस्वती । इति शब्दरत्नावली ॥

गीर्लता, स्त्री, (गीरिव तमोनाशिनी विस्तृता च लता ।) महाज्योतिष्मती । इति राजनिर्घण्टः ॥

गी(र्ब्बा)र्व्वाणः, पुं, (गीर्व्वाणेव बाणोऽस्त्रं यस्य । गयश्चैवास्त्रतयास्य तथात्वम् । अन्तःस्थवकारमध्यपाठे तु गिरं वनुते याचते काङ्क्षतीत्यर्थः स्तुतिप्रियत्वादिति । वन याचनायाम् + “कर्म्मण्यण् ।” ३ । २ । १ । इत्यण् । “पूर्व्वपदात् संज्ञायामगः ।” ८ । ४ । ३ । इति णत्वम् ।) देवता । इत्यमरः । १ । १ । ६ ॥ (यथा, भागवते । ८ । १५ । ३२ ।
“एवं सुमन्त्रितार्थास्ते गुरुणार्थानुदर्शिना ।
हित्वा त्रिविष्टपं जग्मुर्गी(र्ब्बा)र्व्वाणाः कामरूपिणः ॥”)

गी(र्ब्बा)र्व्वाणकुसुमं, क्ली, (गी(र्ब्बा)र्व्वाणप्रियं कुसुमं पुष्पं यस्य ।) लवङ्गम् । इति राजनिर्घण्टः ॥

गीष्पतिः, पुं, (गिरां पतिः । अहरादीनामिति रेफाभावपक्षे “इदुदुपधस्येति ।” ८।३।४१ । इति षः । मुग्धबोधमते “खपि वा ।” इति सूत्रस्य पाक्षिको विधिः ।) वृहस्पतिः । इत्यमरः । १ । १ । २४ ॥ पण्डितः । इति शब्दरत्नावली ॥ अस्य रूपान्तरे गीर्पतिः गीःपतिः । इति मुग्धबोधम् ॥

गु, ङ ध्वनौ । इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं-अकं-अनिट् ।) ङ, गवते । इति दुर्गादासः ॥

गु, शि ओ विष्ठोत्सर्गे । इति कविकल्पद्रुमः ॥ (तुदां-(कुटां)-परं-अकं-अनिट् ।) शि, गुवति अगुवीत् । ओ, गुणः । इति दुर्गादासः ॥

गुग्गुलः, पुं, (गोजति शब्दायतेऽनेनेति । गुज् + क्विप् । गुक् रोगस्तस्मात् गुडति रक्षतीति । गुड् + “इगुपधज्ञेति ।” ३ । १ । १३५ । इति कः । डलयोरैक्यात् डस्य लत्वम् ।) गुग्गुलुः । इत्यमरटीकायां भरतः ॥

गुग्गुलुः, पुं, (गुज्यतेऽनेनेति । गुज शब्दे + क्विप् । गुक् रोगस्तस्मात् गुडतीति । गुड् रक्षणे + बाहुलकात् कुः । डलयोरैक्यात् डस्य लत्वम् ।) रक्तशोभाञ्जनवृक्षः । इति शब्दचन्द्रिका ॥ स्वनामख्यातवृक्षः । स तु गोमूत्रोद्भवः । यथा,—
“गोरोचनाया मङ्गल्याः संजाताः सर्व्वकामिकाः ।
गुग्गुलुस्तु ततो जातो गोमूत्राच्छुभदर्शनः ॥”
इति वह्निपुराणे वैष्णवधर्म्मे शुद्धिव्रतनामाध्यायः ॥ अस्य निर्य्यासः सुगन्धिद्रव्यम् । तत्पर्य्यायः । कुम्भम् २ उलूखलकम् ३ कौशिकः ४ पुरः ५ ॥ इत्यमरः । २ । ४ । ३४ ॥ कुम्भोलुः ६ खलकम् ७ कुम्भोलूखलकम् ८ गुग्गुलः ९ । इति भरतः ॥ जटायुः १० कालनिर्य्यासः ११ देवधूपः १२ सर्व्वसहः १३ महिषाक्षः १४ पलङ्कषा १५ । इति रत्नमाला ॥ यवनद्विष्टः १६ भवाभीष्टः १७ निशाटकः १८ जटालः १९ पुटः २० भूतहरः २१ शिवः २२ शाम्भवः २३ दुर्गः २४ यातुघ्नः २५ महिषाक्षकः २६ देवेष्टः २७ मरुदिष्टः २८ रक्षोहा २९ रूक्षगन्धकः ३० दिव्यम् ३१ । अस्य गुणाः । कटुत्वम् । तिक्तत्वम् । उष्णत्वम् । कफमारुतकासकृमिवातोदरक्लेदशोफार्शोनाशित्वम् । रसायनत्वञ्च । इति राजनिर्घण्टः ॥ दीपनत्वम् । तीक्ष्णत्वम् । कषायत्वम् । मेदःकुष्ठनाशित्वम् । पित्तदाहित्वम् । लघुत्वञ्च । इति राजवल्लभः ॥ विशदत्वम् । सारकत्वम् । रूक्षत्वम् । पाके कटुत्वम् । भग्नसन्धानकारित्वम् । हृद्यत्वम् । सूक्ष्मत्वम् । स्वर्य्यत्वम् । पिच्छिलत्वम् । बलकारित्वम् । व्रणमेहाश्मवातामवातपिड़काग्रन्थिगण्डमालानाशित्वञ्च ॥ * ॥
“माधुर्य्याच्छमयेद्वातं कषायत्वाच्च पित्तहा ।
तिक्तत्वात् कफजित्तेन गुग्गुलुः सर्व्वदोषहा ॥”
स तु पञ्चधा यथा,—
“महिषाक्षो महानीलः कुमुदः पद्म इत्यपि ।
हिरण्यः पञ्चमो ज्ञेयो गुग्गुलोः पञ्चजातयः ॥”
तेषां रूपाणि यथा,—
“भृङ्गाञ्जनसवर्णस्तु महिषाक्ष इति स्मृतः ।
महानीलस्तु विज्ञेयः स्वनामसमलक्षणः ॥
कुमुदः कुमुदाभः स्यात् पद्मो माणिक्यसन्निभः ।
हिरण्याख्यस्तु हेमाभः पञ्चानां लिङ्गमीरितम् ॥”
एषां प्राणिविशेषे प्रयोगो यथा,—
“महिषाक्षमहानीलौ गजेन्द्राणां हितावुभौ ।
हयानां कुमुदः पद्मः स्वस्थारोग्यकरौ परौ ॥
विशेषेण मनुष्याणां कनकः परिकीर्त्तितः ।
कदाचिन्महिषाक्षस्तु मतः कैश्चिन्नृणामपि ॥”
नूतनगुग्गुलो रूपं यथा,—
“स्निग्धकाञ्चनसङ्काशः पक्वजम्बूफलोपमः ।
नूतनो गुग्गुलुः प्रोक्तः सुगन्धिर्यस्तु पिच्छिलः ॥”
पुरातनस्य रूपं यथा ।
“शुष्को दुर्गन्धिकश्चैव त्यक्तप्रकृतवर्णकः ।
पुराणः स तु विज्ञेयो गुग्गुलुर्व्वीर्य्यवर्ज्जितः ॥”
इति भावप्रकाशः ॥ * ॥
अस्य स्थानविशेषे जन्मादिकथनम् । यथा,—
“जायन्ते पुरपादपा मरुभुवि ग्रीष्मेऽर्कसन्तापिताः
शीतार्त्ताः शिशिरेऽपि गुग्गुलुरसं मुञ्चन्ति ते पञ्चधा ।
हेमाभं महिषाक्षतुल्यमपरं सत्पद्मरागोपमं
भृङ्गाभं कुमुदद्युतिश्च विधिना ग्राह्या परीक्षा ततः ॥
वह्नौ ज्वलन्ति तपने विलयं प्रयान्ति
क्लिद्यन्ति कोष्णसलिले पयसः समानाः ।
ग्राह्याः शुभाः परिहरेच्चिरकालजाता-
नङ्गारवर्णसमपूयविगन्धवर्णान् ॥”
इति प्रयोगामृतम् ॥
पक्वस्यास्य पूर्णवीर्य्यत्वं मासत्रयपर्य्यन्तं तिष्ठति । इति परिभाषा ॥

गुच्छः, पुं, (गुध्यति परिवेष्टते इति । गुध् + “शस्यादिभ्यश्छण् ।” इति छण् इति भोजराजः । यद्वा, गुङ शब्दे + क्विप् । गुतं शब्दं श्यति नाशयतीति । गुत् + शो + “आतोऽनुपसर्गे कः ।” ३ । २ । ३ । इति कः ।) स्तवकः । पुष्पादिर थलुया इति भाषा । (यथा, गीतगोविन्दे । ११ । ११ ।
“अक्ष्णोर्निक्षिपदञ्जनं श्रवणयोस्तापिञ्छगुच्छा-[वलीम् ॥”)
स्तम्बः । इत्यादिर गोछा इति भाषा ॥ (उद्भिद्विशेषः । स तु मल्लिकादिः । यथा, मनुः ।१।४८।
“गुच्छगुल्मन्तु विविधं तथैव तृणजातयः ।”
“मूलत एव यत्र लतासमूहो भवति न च प्रकाण्डानि ते गुच्छा मल्लिकादयः ।” इति तट्टीकायां कुल्लूकभट्टः ॥) द्वात्रिंशद्यष्टिकहारः । वसिष्ठ-